मूर्त्तिव्रतं तव । संवत्सरः स्मृतो वह्निस्तथार्कः परिवत्सरः । इदापूर्वस्तथा सोमो ह्यनुपूर्वः प्रजापतिः । वत्पूर्वश्च तथा प्रोक्तो देवदेवो महेश्वरः । तेषां मण्डलविन्यासः प्राग्वदेव विधीयते" । प्राग्वर्द्दित नीलश्वेतरक्तपीत कृष्णकैः मण्डलविन्यासाः कर्त्तव्याः "प्रागवत् प्रपूजनं कार्य्यं होमः कार्य्यो यथाविधि । तिलैर्व्रीहियवैश्चैव घृतेन सितसर्षपैः । तल्लिङ्गैरथ वा मन्त्रैर्नामभिः प्रत्यहं क्रमात् । नक्ताशनस्तथा तिष्ठेत् प्राग्वद्दिवसपञ्चकम् । चैत्रशुक्लं समारभ्य पञ्चमीप्रभृतिक्रमात् । संवत्सराख्ये वर्षेतु व्रतमेतत् समाचरेत् । पूजावसाने दातव्याः सुवर्णाः पञ्च यादव ! । चतुर्वेदविदे देयं शाखाभेदेन यादव ! । एकैकं पञ्चकं देयं यथाकालमिदं भवेत् । यथेष्टं लोकमाप्नोति कामचारी विहङ्गमः" ।

सङ्कटकव्रतं वराहपु० "श्रृणुष्वैकमना भद्रे ! सङ्कटकमिदं व्रतम् । कथयामि महापूर्वं ब्रह्मणा कथितं मम । मासस्य कार्त्तिकस्यापि शुक्लप्रतिपदि व्रतम् । गृह्णीयादेकभक्तन्तु कृत्वा दन्तादिशोधनम् । सायं सङ्कल्पमाधाय द्वितीयायामुपावसेत् । तृतीयायामपि तथा चतुर्थ्यां पारणं भवेत् । शिवं संपूजयेद्भक्त्या उपवासदिनेऽपि च । यत्र विनोपचारेण रात्रौ दद्यात्ततो भुवि । स्वपेत् प्रातः समुत्थाय स्नात्वा देवं समर्च्चयेत्" ।

सन्तानदव्रत भविष्योत्तरोक्तम् "कार्त्तिक्यामुपवासी यः कन्यां दद्यात् स्वलङ्कृताम् । स्वकीयां परकीयां वा नदीसङ्गमके शुभे । एतत् सन्तानदं नाम व्रतं सुगतिदायकम्" ।

सन्तानाष्टमीव्रतं विष्णुधर्म्मोत्तरे "कृष्णाष्टम्यां चैत्रमासे स्नातो नियतमानसः । कृष्णमभ्यर्च्य पूजाञ्च देवक्याः कुरुते च यः । निराहारो नरः पश्चात् कृष्णस्य जगतः पतेः । उपोषितो जपन्मन्त्रं रात्रौ प्रयतमानसः । पूजायाञ्चापि कृष्णस्य सप्त वारान् प्रकीर्त्तयेत् । पाषण्डिनो विकर्म्मस्थान् वैडालान् वकनास्तिकान् । प्रभाते च ततः स्नातो दत्त्वा विप्राय दक्षिणाम् । भुञ्जीत व्रतपूजस्तु कृष्णस्यैव जगत्पतेः । वैशाखज्यैष्ठयोश्चैव पारणं हि त्रिमासिकम् । उपोष्य देवदेवेशं घृतेन स्नापयेद्धरिम् । आषाढ़े श्रावणे चैव मासि भाद्रपदे तथा । उपोषितो द्वितीयं वै पारणं पूर्ववद्भवेत् । आश्विने कार्त्तिके सौम्ये तृतीयं पारणं तथा । पौषे माघे फाल्गुने च चतुर्थं द्विजसत्तम ! । पारणे पारणे पूर्णे घृतेन स्नापयेद्धरिम् । ब्राह्मणेभ्यो घृतं दद्यात्तथैव प्रतिपारणम् । कृत्वा व्रतं नाकमनुप्रयाति मानुष्यमासाद्य च निर्वृतः स्यात् । सन्तानवृद्धिञ्च तथाप्नुतेऽसौ यावदुर्व्वी सागरमेखलान्ताम्" ।

सप्तर्षिव्रतं विष्णुधर्म्मोत्तरे "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम् । मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम् । वशिष्ठञ्च महाभागं पूजयेत् दिवसक्रमात् । कालोद्भवैः फलैः पुष्पैः गोरसैश्च फलान्वितैः । आचरेत् प्रत्यहं स्नानं बहिर्नक्ताशनो भवेत् । महाव्याहृतिभिर्होमं तिलैर्नित्यं समाचरेत् । तर्पयेद्ब्राह्मणांश्चात्र फलमूलैश्च गोरसैः । वारिधान्यञ्च दातव्याः क्षीरपूर्णा द्विजातिषु । एवं संवत्सरं कृत्वा व्रतान्ते चाऽऽहिताग्नये । दद्यात् कृष्णाजिनं राजन् ! यथापूर्वं मयेरितम् । व्रतमेतन्नरः कृत्वा मोक्षोपायञ्च विन्दति" ।

सप्तसारस्वतव्रतं विष्णुधर्म्मोत्तरोक्तम् "चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम् । सुप्रभां काञ्चनाक्षीञ्च विशालां मानसोद्भवाम् । मेघनादां सुवेणुञ्च तथैव विमलोदकाम् । नित्यं संपूजयेद्भक्त्या बहिःस्नानं समाचरेत् । तासाञ्च प्रत्यहं नाम्ना दध्ना होमं समाचरेत् । ब्राह्मणान् भोजयेच्चात्र दध्ना युक्तं सुभोजनम् । घृतोदनं तथाश्नीयात्सकृदेव तथा निशि । एवं संवत्सरं कृत्वा व्रतं सारस्वतं नरः । तत्रोष्य सुचिरं कालं मानुष्ये जायते यदा" इत्यादि ।

सप्तसुन्दरकव्रतं भविष्योत्तरोक्तम् "एकभक्ता च सप्ताहं गौरिगौरित भोजयेत् । संपूज्य पार्वतीं भक्त्या गन्धपुष्पविलेपनैः । ताम्बूलसिन्दूरवरैर्नारिकेलफलेन च । प्रीयतां कुमुदा देवी प्रणिपत्य विसर्जयेत् । एकैकां पूजयेद्देवीं सप्ताहं यावदेव तु । पुनश्च सप्तमे प्राप्ते ताः सप्तैव निमन्त्रयेत् । षड्भ्यः सम्भोजयित्वान्नं यथाशक्त्या विभूषणैः । भूषयित्वा माल्यवस्त्रैः कर्णवेष्टाङ्गुलीयकैः । कुमुदा माधवी गौरी भवानी पार्वती उमा । अम्बिका चेति संपूज्या दर्पणं दापयेत् पृथक् । ब्राह्मणं पूजयेत्त्वेकं वाच्यं सम्पन्नमस्तु मे । सप्तसुन्दरकं नाम व्रतं पापहरं शुभम् । कृत्वा प्राप्नोति सौन्दर्य्यं सौभाग्यमतुलं तथा" ।

समुद्रव्रतं विष्णुधर्म्मोत्तरे "अथातः संप्रवक्ष्यामि समुद्रव्रतमेव ते । चैत्रशुक्लादथारभ्य प्रत्यहं दिनसप्तकम् । लवणं क्षीरं सघृतं दधिमण्डं सुरोदकम् । तथैवेक्षुरसोदञ्च